# ।। अथ गणेश स्तवराजः (गणेशाष्टकम् ) ।।

श्रीगणेशस्तवराज से श्रीमहागणपति की स्तुति, प्रार्थनादि सम्पन्न किया जाता है। सस्वर पाठ से आनन्द उत्पन्न होता है। यथा,

**विनियोग - अस्य श्रीमहागणपतिस्तोत्रन्त्रस्य भगवान् सदाशिवऋषिरनुष्टुप्छन्दः श्रीमहागणपतिर्देवता श्रीमहागणपतिप्रीत्यर्थे पाठे विनियोगः ।** (विनियोग कर पाठ करें ।)

**विनायकैक - भावना - समर्चना - समर्पित,**
**प्रमोदकैः प्रमोदकैः प्रमोद - मोद - मोदकम् ।**
**यदर्पितं समर्पितं नवान्नधान्यनिर्मितं ,**
**न खण्डितं न खण्डितं न खण्डमण्डनं कृतम् ।।1।।**
**सजातिकृद् - विजातिकृत् स्वनिष्ठभेदवर्जितं,**
**निरञ्जनं च निर्गुणं निराकृति - च निष्क्रियम् ।**
**सदात्मकं चिदात्मकं सुखात्मकं परं पदं,**
**भजामि तं गजाननं स्वमाययात्त - विग्रहम् ।।2।।**
**गणाधिप त्वमष्टमूर्तिरीशसूनुरीश्वर -**
**स्त्वमम्बरं च शम्बरं धनञ्जयः प्रभञ्जनः ।**
**त्वमेव दीक्षितः क्षितिर्निशाकरः प्रभाकर -**
**श्चराचरप्रचारहेतु - रन्तरायशान्तिकृत् ।।3।।**
**अनेकदं तमालनीलमेकदन्तसुन्दरं,**
**गजाननं नुमो गजाननामृताब्धिमन्दिरम् ।**
**समस्तवेदवाद - सत्कला - कलापमन्दिरं,**
**महान्तरायकृत् तमोऽर्कमाश्रितोन्दुरुं पुरम् ।।4।।**
**सरत्नहेमघण्टिकानिनादनूपुरस्वनै -**
**र्मृदङ्गतालनाद - भेदसाधनानुरूपतः ।**
**धिमिद्धिमित्तथोङ्गथोङ्ग - थेयि - थेयिशब्दतो,**
**विनायकः शशाङ्कशेखरः प्रहृष्य नृत्यति ।।5।।**
**सदा नमामि नायकैकनायकं विनायकं,**
**कलाकलापकल्पना निनादमादिपूरुषम् ।**
**गणेश्वरं गुणेश्वरं महेश्वरात्मसम्भ्वं,**
**स्वपादपद्मसेविनाम - पारवैभवप्रदम् ।।6।।**
**भजे प्रचण्डतुन्दिलं सदन्तशूकभूषणं,**
**सनन्दनादिवन्दितं समस्तसिद्धसेवितम् ।**
**सुरासुरौघयोः सदा जयप्रदं भयप्रदं,**
**समस्तविघ्नघातिनं स्वभक्तपक्षपातिनम् ।।7।।**
**कराम्बुजात्तकङ्कण पदाब्जकिङ्किणीगणो,**
**गणेश्वरो गुणार्णवः फणीश्वराङ्गभूषणः ।**
**जगत्त्रयान्तरायशान्तिकारकोऽस्तु तारको,**
**भवार्णवस्थघोरदुर्गहा चिदेकविग्रहः ।।8।।**
**यो भक्तिप्रवणश्चराचरगुरोः स्तोत्रं गणेशाष्टकं,**
**शुद्धः संयतचेतसा यदि पठेन्नित्यं त्रिसन्ध्यं पुमान् ।**
**तस्य श्रीरतुला स्वसिद्धिसहिता श्री शारदा सर्वदा,**
**स्यातां तत्परिचारिके किल तदा काः कामनानां कथाः ।।9।।**